विवरणोपन्यासे चायं पक्षः पूर्व्वपक्षीकृत्य दूषितो यथा "अथैवं घटादिषु क्षणिकत्वं साध्येत विमताः उपान्त्याद्यो घटसत्ताक्षणाः स्वस्वानन्तरक्षणभाविघटनाशव्याप्ताः घटसत्ताक्षणत्वादन्त्यघटक्षणवदिति' तन्न विमतो घटनाशक्षणो घटसत्तावान् कालत्वात् सम्मतवदित्याभाससमानत्वात्। अत्र घटाभावानुभवविरोध इति चेत् तर्हि क्षणिकत्वानुमानेऽपि सोऽयं घट इति प्रत्यभिज्ञाविरोधोऽस्त्येव। ननु सर्वे भावाः क्षणिकाः अर्थक्रियाकारित्वात् व्यतिरेकेण शशविषाणवत् विपक्षे स्थायिनोऽर्थक्रियानुपपत्तिर्बाधिका। न च स्थायिनएव पदार्थस्य निमित्तसंयोगादन्यथाभूतस्यार्थक्रियापूर्व्वकं कार्य्यमुत्पादयितुं सामर्थ्यं न क्षणिकस्येति वाच्यम् किमसौ स्थायी पदार्थ एकमेव कार्य्यमुत्पादयेत्? उत युगपदनेकानि? अथवा क्रमेणानेकानि?, तत्र प्रथमद्वितीययोः कृतं स्थायित्वेनासत्कार्य्योत्पादनस्य क्षणिकेनैव सिद्धेः। न तृतीयः समर्थस्य क्षेपायोगात्। अतोभावानामेकस्मिन्नेव क्षणेऽर्थक्रियाकारित्वं सत्त्वमिति, नैतद्युक्तं त्वन्मते अर्थक्रियायादुर्निरूपत्वात्। किमर्थक्रिया नाम संविदां स्वगोचरज्ञानजननं? किंवा क्षणान्तरोत्पादनम्? आद्येऽपि स्वसन्ताने तज्जननं? पुरुषान्तरसन्ताने वा? सर्व्वज्ञसन्ताने वा? नाद्यः संविदां स्वप्रकाशत्वेन तदसम्भवात्, अस्तु तर्हि द्वितीयः, देवदत्तसंवेदनं हि स्वप्रकाशमपि यज्ञदत्तसंवेदनस्य विषयत्वाज्जनकं भविष्यतीति, तदसत् न तावत् प्रत्यक्षज्ञानस्य विषयतया जनकमिति शक्यं वक्तुं, न हि पुरुषान्तरज्ञानं प्रत्यक्षतया क्वचिद्दृष्टं। नाप्यनुमानज्ञानविषयतया जनकं त्वया पुरुषान्तरप्रत्यक्षज्ञानस्यैव विषयजन्यमित्यङ्गीकारात्। ननु तर्हि तृतीयोऽस्तु सर्व्वज्ञस्य हि प्रत्यक्षज्ञानं सर्वपुरुषगतसंवेदनानि विषयीकुर्वत् तैर्जन्यते, मैवं तथा सति सोपप्लवैः सांसारिकसंवेदनैरीश्वरसंवेदनमप्युपप्लुतं स्यात् तन्मते ज्ञानज्ञेययोरभेदात्। अथ ईश्वरज्ञानमुपप्लुतमपि नोपप्लवदोषं भजते तत्त्वज्ञानेनोपप्लवस्य बाधादिति चेत् मैवं न तदेव ज्ञानं सोपप्लवं बाधते उपप्लवस्यैकस्मिन्नेव क्षणे प्राप्तिबाधयोरसम्भवात् नापि ज्ञानान्तरमुत्पाद्य उपप्लवं बाधितुं क्षमते पूर्व्वज्ञानोपप्लवस्य ज्ञानान्तराविषयत्वात् विषयत्वे पूर्व्वज्ञानान्तरमप्युपप्लुतं सत् कथं बाधकं स्यात्? नचोपप्लवांशं विहाय संवेदनांशस्यैवेश्वरज्ञानं प्रति विषयतया जनकत्वं, तस्मिन् सत्युपप्लवानभिज्ञः कथमीश्वर उपदिशेत्। नापि क्षणान्तरोत्पादनमर्थक्रियेति द्वितीयः पक्षः, त्वत्प्रक्रियया चरमक्षणस्यासत्त्वप्रसङ्गात् तथा हि विज्ञानानि स्थायित्वकल्पनया द्रव्यगुणादिदोषैर्विषयैश्चोपप्लुतानि पूर्व्वपूर्व्वसजातीयविज्ञानलक्षणेभ्यः संस्कारेभ्य उत्तरोत्तराण्युत्पद्यन्ते तत्र सर्वमिदं क्षणिकमिति भावनया स्थायित्वकल्पना निवर्त्तते स्वलक्षणमिति भावनया द्रव्यगुणादिकल्पना नश्यति दुःखमिति भावनया रागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः क्षीयन्ते, शून्यमिति भावनया विषयोप्लवविगमः। ततश्च भावनाभेदैश्चतुर्विधैश्चतुर्विधसंस्कारविरोधिभिश्चतुर्विधोपप्लवे क्रमेण मन्दीकृते भावनाप्रकर्षस्यान्त्यभूतादुपान्त्यप्रत्ययात् सर्वोपप्लवविरहि विज्ञानमुत्पद्यते तच्च संस्कारसन्तानान्त्यश्चरमक्षण इति गीयते, तस्य च कार्य्याभावादसत्त्वापत्तौ तथैव क्रमेण पूर्व्वपूर्व्वज्ञानानामप्यसत्त्वं प्राप्नुयात्। चरमक्षण ईश्वरज्ञानस्य जनकस्तद्विषयत्वादितिचेत् तर्हि चरमक्षणसर्व्वज्ञज्ञानयोर्विशुद्धतया तुल्यस्वभावयोरेकसन्तानत्वं स्यात् तुल्यस्वभावयोः कार्यकारणभावस्यैकसन्तानलक्षणत्वात् ततश्च सन्तानाविच्छेदादनिर्मोक्षः स्यात्। सर्व्वज्ञसन्तानप्रवेशएव मोक्ष इति चेत् एवमपि चरमक्षणस्य ईश्वरज्ञानविषयत्वं दुर्निरूपमिति, तज्जनकत्वं दूरापास्तं, भेदे हि सति संविदो र्विषयविषयिभावः नचेह भेदोऽस्ति। न तावत् संवित् संविदन्तरात् संविदाकारेण भिद्यते तथासति वैलक्षण्यसिद्धये प्रतियोगिनोऽसंवित्त्वप्रसङ्गात् नाप्यसंविदाकारेण धर्म्मिणोरसंवित्त्वप्रसङ्गात् तस्माच्चरमक्षणस्य सर्व्वज्ञज्ञानोत्पादनलक्षणयाऽर्थक्रियया सत्त्वं दुःसम्पादम्। यद्यस्यार्थक्रिया कल्प्येत तदापि सा किं कारणस्य सत्त्वं सम्पादयति? उत प्रतीतिम्? नाद्यः कार्य्यात् पूर्व्वमेव कारणस्य सत्त्वात् अन्यथा कारणत्वायोगात्। द्वितीये तत् कार्य्यं स्वकार्य्येण प्रतिभासितं सत् कारणप्रत्यायकं तदपि तथैवेत्यनवस्था स्यात्। संवित् स्वयमेव स्वात्मानं प्रकाशयतीति नानवस्थेति चेत् तर्ह्यर्थक्रिया प्रतीतिहेतुरिति पक्षो हीयेत। स्वयमेव स्वार्थक्रियेति वदन आत्माश्रयं दुर्निवारम्। तदेवं न सत्त्वं नार्थक्रियाकारित्वं किन्तु स्वाभाविकः कश्चिद्धर्मः, तथा चैकस्मिन् क्षणेऽर्थक्रियां कृत्वा पुनस्तूष्णींभूतस्यापि स्थायिनः सत्त्वं न विरुध्यते। यदुक्तं स्थायिनः क्रमेणानेककार्य्योत्पादकत्वं नास्ति समर्थस्य क्षेपायोगात् इति तदसत शक्तस्यापि सहकारिसन्निधानविशेषक्रमापेक्षया कार्य्यक्रमउपपन्नः लोके तथैवानुभवात्। अथ मतम् शक्तस्य सहकार्य्य-